International Journal of Sanskrit Research 2024; 10(2): 215-219

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(2): 215-219
© 2024 IJSR
www.anantaajournal.com
Received: 04-01-2024
Accepted: 09-02-2024

**Dr. Sudesh**
Assistant Professor,
Department of Sanskrit,
Ch. Bansilal University,
College M.N.S Govt. College,
Bhiwani, Haryana, India

**Corresponding Author:**
**Dr. Sudesh**
Assistant Professor,
Department of Sanskrit,
Ch. Bansilal University,
College M.N.S Govt. College,
Bhiwani, Haryana, India

# साहित्यशास्त्रे व्यञ्जनाविमर्शः

**Dr. Sudesh**

**सारांश**
साहित्यशास्त्रे एकत्र लोकानुरञ्जनाय समाजाय च समुचितां शिक्षां प्रदातुं लक्ष्यत्वेन काव्यरुपे गद्य-पद्य-नाचकानि विभिन्नशिक्षाप्रदाः कथाश्च विद्यन्ते, अपरत्र लक्षणरुपे काव्यस्वरुपम्, काव्यप्रयोजनानि, काव्याङ्गानि, काव्यहेतुः, शब्दशक्तयः, अलङ्काराः, छन्दांसि, रसाः, गुणदोषाः इत्यादीनाञ्च विवेचनं क्रियते। साहित्यशास्त्रे तिस्रः शब्दशक्तयः अभिधा, लक्षणा, व्यञ्जना चेति प्रतिपादितां वर्तन्ते। आसु रसादीनां बोधकायाः व्यञ्जनाशक्तेः साहित्यशास्त्रे कीदृशं स्वरुपं वर्णितं वर्तते इति धिया शोधपत्रमिदं व्यलेखि। परस्मिन् साहित्यशास्त्रे वयञ्जनास्वरुपप्रतिपादनात् स्पष्टं भवति यद् अभिधालक्षणातात्पर्याख्यावृत्तयो रसबोधने न क्षमाः, तस्माद् रसादीनां बोधे व्यञ्जनाशक्तिः स्वीकरणीयाः।

**कुटशब्द:** साहित्यशास्त्रे व्यञ्जनाविमर्शः, लोकानुरञ्जनाय, गद्य-पद्य

## प्रस्तावना

शब्दस्य प्रकृतिप्रत्ययादेरर्थबोधे सहकारिवृत्तयो हि तच्छक्तयः इत्यालङ्कारिकैर्व्यवह्रयन्ते। याश्च नैयायिकादयः वृत्तिनाम्ना गदन्ति। सा त्रिविधा वाच्यलक्ष्यव्यङ्ग्यार्थाः त्रिभिश्शक्तिभिर्बोध्यास्तस्मात् तिस्रःशब्दशक्तयोऽभिधा-लक्षणा-व्यञ्जना इत्यालङ्कारिकैर्मताः। यथा कविराजो विश्वनाथो भणति-

> वाच्यर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः
> व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः॥[1]

एवञ्च अस्माच्छब्दादयमर्थो बोधब्य इति ईश्वर इच्छा शक्तिरिति नैयायिकानां मतम्,[2] तमेवालङ्कारिका अभिधा वर्णयन्तीति नामभेदेऽपि विषयभेदाभावात् ताः अभिधादि तिस्रः शब्दस्य शक्तयः इति वदने नास्ति कश्चित् संशयः। आसु तिस्रिषु शक्तिषु सङ्केतितार्थस्य स्वज्ञानेन शाब्दबोधजननाद्धेतोः आदौ शक्तिरभिधा विद्यते। तथा सति मुख्यार्थबोधशक्तित्वमभिधात्वमिति। उक्तश्च विश्वनाथेन तत्र सङ्केतितार्थस्य बोधनाग्रिमाभिधोच्यते इति।[3] अत्र आचार्यममट्टःअवोचत् यत् –समुख्योऽर्थस्तत्र मुख्यो

---

[1] साहित्यदर्पणः, 2-3।

[2] परमलघुमञ्जूषा,शक्तिप्रकरणम्

[3] साहित्यदर्पणः, 2-4।

व्यापार अभिधोच्यते।[4] अर्थात्साक्षात्सङ्केतितस्य मुख्यार्थस्य विषये वाचकशब्दस्य मुख्य व्यपाराभिधारित्युच्यते। येन कश्यचित् केनचित् गाममानय इत्युक्ते तं गवानयनप्रवृत्तिमुपलभ्य बालोऽस्य वाक्यस्य सास्नादि पिण्डानयनम् इत्यर्थः प्रथमेव ज्ञायते, तत् पश्चात् गां बाधनम्, अश्वमानय इत्यादावावापोद्वापाभ्यां गोशब्दस्य सास्नादिमानर्थः आनयनपदस्य च आहरणमर्थः इति सङ्केमवधारयति। केचित् च पूर्वमगतस्य शब्दस्य साहचर्यात् सङ्केतमवधारयति। यथा –विकसितकमलमध्ये मधुकरः मधुनि पिबति इत्यत्र मधु करोतीति व्युत्पत्या मधुकरशब्दस्य भ्रमरे सङ्केतो मधुमक्षिकायां वा इति संशये भ्रमरस्यैव कमले पूर्वं मधुपानावलोकेन कमलपदसाहचर्यात् मधुकरशब्दस्य भ्रमर एव सङ्केतमवधारयति। क्वचिच्च आप्तोपदेशादपि सङ्केतमवधारयति यथा- अयमश्वशब्दवाच्यः इत्यादि।

अभिधया ज्ञानानन्तरं बोध्यतया तदनुजत्वात् व्यञ्जनाज्ञानात् पूर्वं बोध्यतया च तदग्रजत्वात् मध्यमा शक्तिर्लक्षणेति। मुख्यार्थस्यान्वयानुपपत्तिग्रहे सति अनादिवृद्धव्यवहारप्रसिद्धवशात् प्रयोजनविशेषाद्वा यया शक्त्या मुख्यार्थसम्बन्धयुक्तोऽन्य मुख्यार्थतावच्छेदसातिरिक्तधर्मावच्छिन्नोर्थो बुध्यते सा लक्षणाशक्तिरिति। चाभिधेयार्थान्वयानपपत्तिग्रहत्वे सति रूढिप्रयोजनान्यतरप्रयोज्यमुख्यार्थसम्बन्धवत्तदतिरिक्तार्थप्रतिपादकशक्तित्वं लक्षणात्वम्। यथा-

मुखयार्थबाधे तद्युक्तो ययान्योर्थः प्रतीयते
रूढे प्रयोजनाद्वासौ लक्षणाशक्तिरर्पिता॥[5]
मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्
अन्योर्थो लक्षते यत् सा लक्षणारोपिता क्रिया॥[6]

मुख्यार्थबाधे सतितेन मुख्यार्थेन सम्बन्धोऽन्यार्थोयया शक्त्या रुढिवशात् प्रयोजनत्वात् प्रतीयते सा लक्षणा शक्तिरिति। यथा-कलिङ्गः साहसिकः इतायादौ कलिङ्गादिशब्दोवशात्देशविशेषादिरुपे स्वार्थेऽसम्भवन्रूढिवशात् यया शब्दशक्त्या स्वसंयुक्तान् परुषादीन् प्रत्यायति यया च गङ्गायां घोषः इत्यादौ गङ्गादिशब्दो जलमयादिरूपार्थवाचकत्वात् प्रकृतेऽसम्भवन् प्रयोजनात् स्वस्य समीप्यादिसम्बन्धसम्बन्धिनं तटादिं बोधयति सा लक्षणेति।

इयञ्चापि लक्षणाशख्ति लक्षणलक्षणा-उपादानलक्षणेति भेदात् द्विधा वर्तते।कथिताञ्च काव्यप्रकाशकारेण-

स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्।
उपादानं लक्षणां चत्युक्त्वा शुद्धा सा द्विधा॥[7]

यत्र कश्चिदपि शब्दः स्वमुख्यार्थस्य तात्पर्यसिद्धये स्वार्थमत्यजन्नपि अपरमर्थमाक्षिपति अर्थात् स्वसम्बन्धमन्यर्थं गृह्णाति तत्र परार्थस्य ग्रहणात् उपादानलक्षणा भवति। इयमेव वैयाकरणैः अजहत्स्वार्थं निगद्यते। यथा- कुन्ताः प्रविशन्ति इत्यत्र कुन्तेषु चेतनधर्मस्याभावात् ते प्रविष्टुमसमर्थाः, अतोऽत्र मुख्यार्थस्य बाधे कुन्तशब्दः स्वार्थस्य सिद्धये स्वीयसम्बद्धं कुन्तधारिपुरुषमाक्षिपति। अतः कुन्तधारिणः पुरुषाः प्रविशन्ति इत्यर्थसिद्धावत्र उपादानलक्षणा प्रतीयते।

यत्र शब्दोऽपरस्यार्थस्य सिद्धये स्वीयमर्थं परित्यज्य परार्थस्योपस्थापको भवति अर्थात् अन्यार्थस्य सिद्धये स्वीयमर्थं परित्यजति तत्र लक्षणलक्षणा भवति। इयमेव शाब्दिकैः जहत्स्वार्थं निगद्यते।यथा- गङ्गायां घोषः इत्यत्र गङ्गाशब्दः परार्थस्य तटरुपार्थस्य सिद्धये स्वीयं जलप्रवाहरुपं मुख्यार्थस्य समर्पयति।

**व्यञ्जनाशक्ति**

व्यज्यतेऽनन्यलभ्यो वाच्यलक्ष्याभिन्नोर्थः अनया इति व्यञ्जना । यथा- नागेशेन मञ्जूषायां कथ्यते-

"मुख्यार्थस्यबाधनिरपेक्षबोधको मुख्यार्थसम्बन्धासम्बद्धसाधारणः प्रिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना।"[8]

साहित्यदर्पणकारेण व्यञ्जनाशक्तिरित्थं परिभाषयता-

विरतास्वभिधाद्यासु ययार्थो बोध्यतेऽपरः।
सा शक्तिर्व्यञ्जना नाम शब्दस्यार्थस्यार्थादिकस्य च॥[9]

अर्थात् अभिधा-लक्षणा-तात्पर्यात्मिका वृत्तयः वृत्तयः यदा स्वीयं-स्वीयमर्थं बोधयित्वा निवृत्तव्यापाराः भवन्ति तदा यया वृत्या शक्त्या वा अभिधादिव्यतिरिक्तो भिन्नोऽर्थो बोध्यते सा शब्दस्य अर्थस्य च वृत्तिः (शक्तिः) व्यञ्जना इत्युच्यते। इत्थमेव लिलेख विश्वनाथाचार्यः-

[4] काव्यप्रकाशः, 2-8।
[5] साहित्यदर्पणः, 2-5।
[6] काव्यप्रकाशः, 2-9।
[7] काव्यप्रकाशः 2-10
[8] परमलघुमञ्जूषा,व्यञ्जनाविचारः
[9] साहित्यदर्पणः, 2-12।

शब्दबुद्धिकर्मणां विरम्यव्यापाराभावः इति नयेनाभिधालक्षणातात्पर्याख्यासु तिसृषु वृत्तिषु स्वं स्वमर्थं बोधयित्वोपक्षीणासु यया अपरोऽन्योऽर्थो बोध्यते सा शब्दस्यार्थस्य प्रकृतिप्रत्यादेश्च शक्तिर्व्यञ्जनध्वननगमनप्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम। [10] यथा गङ्गायां घोषः इत्यत्र गङ्गाशब्दस्य जलप्रवाहरुपमर्थं बोधयित्वा विरतयाः अभिधयाः, तटाद्यर्थमात्र बोधयित्वा विरतयाः लक्षणायाश्च परं यया शक्त्या शीतत्वपावनत्वादिव्यङ्ग्यार्थो बोध्यते सैव व्यञ्जना शक्तिरिति।

इयञ्च व्जजनाशक्तिः शब्दार्थस्यार्थादिकस्य च इति प्रागुक्तत्वात् शाब्दी आर्थी चेति द्विधा भवति। तत्रापि शाब्दीव्यञ्जना अभिधालक्षणामूलत्वात् द्विधा वर्तते-

अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा[11]

## अभिधामूलाव्यञ्जना

अभिधान्वयव्यतिरेकानुविधायित्वम् अभिधामूलत्वमिति। इयञ्च परिभाषिता साहित्यदर्पणकारेण-

अनेकार्थस्य शब्दस्य संयेगाद्यैर्नियन्त्रिते।
एकार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया॥[12]

अर्थात् एकाधिकस्थले गृहीतशक्तिकत्वात् बह्वर्थस्य यथा-विष्णुसिंहकपिप्रभृत्यनेकाभिधेयस्य हरिशब्दस्य एकास्मिन्नर्थे संयोगविप्रयोगप्रभृतिनियामकपदार्थैः नियन्त्रिते सति तत्तच्छप्रतिपाद्यापरार्थस्य ज्ञानस्य हेतुः या व्यञ्जनाशक्तिः भवति सैव अभिधामूला व्यञ्जना इत्युच्यते। यथा-सशङ्खचक्रो हरिः इत्यत्र हरिशब्दः ननार्थको वर्तते। यथोक्तं कोषग्रन्थेषु-

यमानिलेन्द्रचन्द्रार्कविष्णुसिंहाशुवाजिषु
शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु॥[13]

एवम् एषु अष्टादशस्वर्थेषु हरिशब्दस्य अर्थः विष्णुः,अर्कः वेति इति सन्देहे सति सशङ्खचक्रो हरिशब्देन विष्णुः इत्येव अर्थमभिधत्ते,तथैव अशङ्खचक्रो हरिः इत्यत्र तद्वियोगेन तमेवार्थमभिधत्ते।सैषा शक्तिः संयोगादिभिर्नानार्थेषु नियम्यत-

संयोगो विप्रयोगश्च सहचर्यं विरोधिता
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्यसन्निधिः॥
सामर्थमौचिती देशः कालो व्यक्तिः स्वरादयः
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥[14]

साहचर्यं यथा-भीमार्जुनौ इत्यत्र अर्जुनशब्दः पार्थवाचकः कार्तवीर्यवाचको वेति सन्देहे भीमस्य साहचर्यादत्र पार्थ इत्येवार्थः बुध्यते। विरोधितायां यथा- कर्णार्जुनौ इत्यत्र कर्णशब्दः श्रवणेन्दियस्य वाचकः उतः राधेय इति संशये अर्जुनेन सह बद्धवैरत्वात् कर्णः सूतपुत्रः राधेय इत्येवार्थो व्ञ्जनावगम्यते। अर्थयोगात् स्थाणुं वन्दे इत्यत्र स्थाणोः शिवः शाखाग्रभागहीनतरुमूलमर्थ इति सन्देहे वन्दे इति पदप्रयोगातात्पर्यात् शिवस्यैव संयोगाभिः हरि- अर्जुन-कर्ण-स्थाणुशब्दाः तत्तच्छब्दानुसारं एकैकस्मिनर्थेऽभिधया नियन्त्रिताः,इत्थमेवान्यत्रापि उदाहरणेषु जानियात्।

## लक्षणामूला व्यञ्जना

लक्षणान्वव्यतिरेकानुविधायित्वम् लक्षणामूलत्वमिति। इयञ्च परिभाषिता साहित्यदर्पणे-

लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्
यदा प्रत्यायते सा स्यात् व्यञ्जना लक्षणाश्रयता॥[15]

वाचकशब्दे सत्यपियन्निमितं शब्दो हि लक्षणिकत्वेन प्रयुज्यते तथाविधं प्रयोजनं यया वृत्या प्रत्यायते सा प्रयोजनप्रत्यायिकावृत्तिः लक्षणामूला कथ्यते। यथा-गङ्गायां घोषः इत्यत्र जलप्रवाहरुपार्थज्ञापनानन्तरं विरतायामभिधायां तटाद्यर्थबोधनात् विरतायां लक्षणायां शैत्यपावनत्वादिवाक्यार्थः लक्षणामूलया व्यञ्जनशक्त्या बोध्यते। इदृशं प्रयोजनं सङ्केतिकतत्वाभावात् नाभिधया, न च तत्पवृतौ हेतुत्रयाभावात् लक्षणया ज्ञायते। गङ्गाशब्दः स्वीयजलप्रवाहरुपेऽर्थे सबाध इति तद्युक्ततात्पर्युपपत्तये तटाद्यर्थ लक्षयति तद्वत् तटादि शब्दे सबाधः स्यात् तत्प्रयेजनञ्च लक्षयेत् । न चेह तटं मुख्यार्थो, बाधः न च गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः सम्बन्धः। न हि प्रयोजने लक्ष्ये प्रयोजनम् नापि गङ्गाशब्द तटमपि प्रयोजनं प्रतिपादयितुमसमर्थः । एवमपि प्रयोजनं चेल्लक्ष्यते तत्प्रयोजनानन्तरेण तदपि प्रयोजनानन्तरेण प्रकृताप्रतीतिकृदनवस्था भवेत्।

---

[10] साहित्यदर्पणः 2-14

[11] साहित्यदर्पणः, 2-14

[12] साहित्यदर्पणः, 2-13

[13] अमरकोषः 3.174

[14] वाक्यपदीयम्-पदकाण्ड, 317-318।

[15] साहित्यदर्पणः, 2-15।

**आर्थीव्यञ्जना**

यत्र वक्तुः श्रोतुः वक्तृवचनस्य अन्यसन्निधिवाच्ययोः,प्रकरणस्य देशस्य कालस्य काकोः(ध्वनिवकारस्य)चेष्टादिकस्य च वैशिष्ट्याद् यया शक्त्या उपस्थितार्थभिन्नेऽर्थो बोध्यते सा शक्तिः आर्थी व्यञ्जनेति गद्यते।लिखितं साहित्यदर्पणे यथा-

वक्तृबोधद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः
प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च
वैशिष्ट्यादन्यमर्थं या बोधयेत् साऽर्थसम्भवा॥[16]

एषु वक्तृबोधद्धव्यवाक्यप्रस्तावदेशकालानां वैशिष्ट्यस्य उदाहरणम्-

काको मधुः कुपित एष च पुष्पधन्वा,
धीरा वहन्ति रतिखेदहराः समीराः।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जुदूरे
पतिः कथय किं करणीयमद्य॥[17]

अत्रैतं देशं प्रति त्वं शीघ्रं प्रच्छन्नकामुकं प्रेषय इति सखीं प्रति कयाचित् व्यरच्यते। अत्र व्यक्त्याः कामुकत्वं वाक्यस्य रमणेच्छाबोधकत्वं प्रकरणस्य रतिकथाप्रसङ्गः देशकालयोश्च नितान्तोद्दीपकत्वं प्रकरणस्य रतिकथाप्रसङ्गः देशकालयोश्च नितान्तोद्दीपकत्वञ्च तत्तत्साधारणतो वैशिष्ट्यमिति। एवमेवान्यत्रापि बोध्यव्यकाकुचेष्टादिकानामपि बोध्यते।
नैयायिकादिभिस्तु शक्तिरियं नाङ्गीक्रियते यदुक्तं न्यायकुसुमाञ्जलौ उदयनाचार्येण-

श्रुतान्वयादनाकाङ्क्षं न वाक्यं ह्यन्यदिच्छति।
पदार्थान्वयवैधुर्यात्तदाक्षिप्तेन सङ्गति॥[18]

अर्थात् श्रुतपदानामन्वयाद् आकाङ्क्षारहितं वाक्यं वाक्यर्थभिन्नपदार्थं नेच्छति तस्य च पदार्थान्वये अनुपपत्तिकारणात् तटादिरुपलक्षणीयार्थेन सङ्गतिर्भवति। अत्र चिन्त्यं शून्यवासगृहम् इत्यादौ न मुख्यार्थबाधो वर्तते येन तत् लक्षणाप्रवृत्तिः स्यात्। यदि च गङ्गायां घोषः इत्यत्र प्रयोजनं लक्ष्यं स्यात् तर्हि तटस्य मुख्यार्थं बाधयित्वा च स्यात्। तस्यापि लक्ष्यार्थत्वेन अङ्गीकारात् तस्य प्रयोजनानन्तरं स्वीकरणीयं स्यात् पुनः तस्यापि प्रयोजनान्तरम्। इत्थं प्रयोजनपरम्परानुसन्धाने शीतत्वपावनत्वादिरुपो लक्ष्यार्थो ह्यनवस्थादोषितो भविष्यति। यदि तत्र प्रयोजनविशिष्टतीरे लक्षणा क्रियते तर्हि शैत्यादिप्रयोजनविशिष्टतीरार्थे लक्षणा न सम्भवति अतः तदपि नोचिता। यतोहि विषयप्रयोजनयोः युगपत् प्रतात्यसम्भवात् । लक्षणाजन्यतारज्ञानं कारणं शीतत्वादिप्रयोजनज्ञानञ्च तत्कार्यमिति, तेन च तयोः पौर्वापर्यावश्यम्भावेन यौगपद्यासम्भवादिति। यथा नीलादिसंवेदनानन्तरमेव हि ज्ञतताया: अनुव्यवसायस्य वा सम्भवः। एवञ्च प्रयोजनविशिष्टे लक्षणायाः असम्भवात् प्रयोजनस्यापि पृथग्लक्ष्यतोऽनवस्थापातात् प्रयोजनप्रतीत्यर्थं व्यञ्जनाऽङ्गीकार्यमेव इति।
अपि च अलङ्कारशास्त्रं रसप्रधानम्। न च अभिधालक्षणातात्पर्याख्या वृत्तयोः रसबोधने क्षमाः, तस्मादपि रसादीनां बोधे व्यञ्जनावृत्तिःस्वीकरणीया एव। यथा प्रतिपादितं विश्वनाथेन-

वृत्तीनां विश्रान्तेनभिधातात्पर्यालक्षणाख्यम्
अङ्गकार्या तुर्या वृत्तिर्बोधे रसादीनाम्॥[19]

यैश्चास्याः व्यञ्जनावृत्तेः अनुमाने अन्तराभावः कल्पितः तदपि नोचितम्। यतोहि अनुमानजन्या प्रतीतिः आलङ्कारिकैः आस्वाद्यत्वेन नाभिमन्यते केवलं स्वप्रकाशकमात्रविश्रान्तः सान्द्रानन्दनिर्भर एव स्वीक्रियते। तेनात्र अनुमानेन साधयितुमभिष्टात् आनन्दमयस्वप्रकाशकज्ञानविषयरुपात् अर्थान्तरस्य अनुमानेन निष्पादनात् हेतोः आभासता एव। अपि भ्रम धार्मिक विश्वस्त इत्यत्र गृहे श्वनिवृत्या विहितं भ्रमण् गोदावरीतीरे सिंहोपलब्धे अभ्रमणम् अनुमापयति इति यद् वक्तव्यं तत्र अनैकान्तिको हेतुः। यतोहि भिरोरपि गुरोः प्रभोर्वा आज्ञया प्रियानुरागेण वा गमनस्य सम्भवात्, कुलटायाः वचनं प्रमाणिकं न वेति सिंहसत्त्वस्य सन्देहात् हेतोः सन्दिग्धासिद्धिरिति।
इत्थं सङ्केतितार्थमात्रबोधनात् विरतया अभिधायाः मुख्यार्थबाधे तद्योगे रूढिप्रयोजनवशाच्च लक्ष्यार्थमात्रबोधनात् विरतया लक्षणायाः परं यया शक्त्या एतद्भिन्नोऽर्थो बोध्यते यश्चार्थः रसादीनां बोधने क्षमो भवति तादृशस्य व्यङ्ग्यर्थस्य प्रतिपादका व्यञ्जनाशक्तिरित्यालङ्कारिकैः स्वीक्रियते।

## संदर्भ सूची


1. महाभाष्य पतंजली। का0 प्र0 29
2. ध्वन्यालोक पृष्ठ 12
3. यतोलक्षणावृतामेव स केवलं न प्रसिद्ध लक्ष्ये तु परीक्ष्यमाणे स एव सह सहृदयहृदयाहलादि काव्यतत्वम्। ध्वन्यालोक–पृष्ठ 54


[16] साहित्यदर्पणः, 2,16-17

[17] साहित्यदर्पणः, काव्यविचारः

[18] न्यायकुसुमाञ्जलिः

[19] साहित्यदर्पणः, 5-1।

4. यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ। व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः । ध्वन्या० 1/13
5. माधवटीका पृ० 3
6. इदमुत्तममतिशयिनी व्यंग्ये वाच्याद ध्वनिर्बुधैः कथित। काव्यप्रकाश प्र० उ० पृ० 28।
7. काव्यप्रकाश द्वितीय उल्लास पृष्ठ 70, 71।'
8. का० प्र० तृतीय उल्लास–3/23 पृ० 89।
9. नैमित्तिकानुसारेणनिमित्तानि कल्प्यन्ते– काव्यप्रकाश पंचम उल्लास पृ० 229
10. काव्यप्रकाश पंचम उल्लास पृ० 229
11. काव्यप्रकाश पंचम उल्लास पृ० 230
12. काव्यप्रकाश पंचम उल्लास पृ० 235
13. काव्यप्रकाश पंचम उल्लास पृ० 237
14. काव्यप्रकाश पंचम उल्लास पृ० 230
15. काव्यप्रकाश पंचम उल्लास पृ० 259
16. ध्वनिसम्प्रदाय और उसके सिद्धांत – भोलाशंकरव्यास पृ० 189
17. साहित्यदर्पण द्वितीय उल्लास
18. सर्वेषां प्रायतौऽर्थानां यज्जकत्वमपोष्यते।काव्यप्रकाश 2/7
19. ध्वनिप्रस्थान में आचार्य मम्मट का अवदान– डॉ. जगदीश चन्द्र शास्त्री
20. प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम।
    यतत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवांगनासु।
    –ध्वन्या. प्र.उ., का. 4
21. वक्रोक्ति–जीवित पृ० 2
22. अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
23. संयोगाद्यैरवाच्यचार्थधीकृद् व्यापृति रंजनम्।
    –काव्य. प्र0., द्वि. उ. सू. 32
    नाभिधासमयाभावात्।
    –का.प्र., द्वि. उ. सू. 24
24. हेत्वभावान्न लक्षणा–का. प्र., द्वि. उ. सू. 25
25. वक्तृवोद्धव्काकूनां वाक्य वाच्यान्यन्निधेः।।
    प्रस्तावदेशकालादेवैर्शिष्टयात् प्रतिभाजुषाम् ।।
    योऽर्थस्यान्यार्थधीर्हेतु र्व्यापारो व्यक्तिरेवसा।।
    –का. प्र., उ. सू.–37
26. शब्दप्रमाणवेद्योऽर्थो व्यन्क्त्यर्थान्तरं यतः।
    अर्थस्य व्यंजकत्वे तच्छब्दस्य सहकारिता।।
    – का. प्र., तृ. उ. पृ० स. 89